# || शनि स्तोत्र ||

विनियोग

अस्य श्री शनैश्चर स्तोत्रस्य दशरथ ऋषिः
शनैश्चरो देवता त्रिष्टुपछन्दः शनैश्चरप्रीत्यर्थ जपे विनियोगः

दशरथ उवाच

कोणोऽतको रौद्रयमो ऽथ बभ्रुः कृष्णशनिपिंगल मन्द सौरिः
नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्री रविनन्दनाय ...१

सूरासूराः किंपुरूषोरगेन्द्रा गंधर्व विद्याधर पन्नगाश्च
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ...२

नरानरेंद्राः पशवोमृगेंद्रा वन्याश्चये कीटपतंगभृगाः
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ...३

देशाश्च दुर्गाणि वनानि यत्र सेना निवेशाः पुरपत्तनानि
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्री रविनन्दनाय ...४

तिलैर्यवैर्माष गुडान्नदानै लोहेन नीलाम्बरदानातो वा
प्रीणाति मंत्रैर्निजवासरे च तस्मै नमः श्री रविनन्दनाय ...५

प्रयागकूले यमुनातटेवा सरस्वती पुण्यजले गुहायाम्
यो योगिनां ध्यान गतोऽपि सूक्ष्मस्तस्मै नमः श्री रविनन्दनाय ...६

अन्याप्रदेशात्स्वगृहं प्रविष्ठस्तदीयवारे स नरः सुखी स्यात्
गृहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्री रविनन्दनाय ...७

स्रष्टा स्वयं भूर्भुवनत्रयस्य त्राता हरिशो हरते पिनाकी
एकस्त्रिधा ऋग्यजुः सामर्मूर्तिस्तस्मै नमः श्री रविनन्दनाय ...८

शन्यष्टकं यः प्रयतः प्रभाते नित्यं सुपुत्रैः पशुबांधवैश्च
पठेत्तु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाण पदं तदंते ...९

कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोंऽतको यमः
सौरिः शनेश्चरो मंदः पिप्पलादेन संस्तुतः ...१०

एतानि दश नमानि प्रातरूत्थाय यः पठेत्
शनेश्चर कृता पीडा न कदाचित् भविष्यति ...११

पिप्पलाद उवाच

नमस्ते कोण संस्थाय पिंगलाय नमोस्तुते
नमस्ते बहु रूपाय कृष्णायच नमोस्तुते ...१

नमस्ते रौद्रदेहाय नमस्ते चांतकाय च
नमस्ते यमसंज्ञाये नमस्ते सौरये विभो ...२

नमस्ते मंदसंज्ञाय शनेश्चर नमोस्तुते
प्रशादं कुरू देवेश दीनस्य प्रणतस्य च ...३

.. इति श्रीशनैश्चस्तोत्र सम्पूर्णम् ..

## || शनिचा जप मंत्र ||

ॐ प्रां प्रीं प्रौं सः शनये नमः

नीलांजन समाभासं रविपुत्रं यमाग्रजम्
छाया मार्तंड संभूतं तन्नमामि शनैश्चरम् ..

शनि गायत्री

ॐ कृष्णांगाय विद्महे रविपुत्राय धीमहि तन्नो सौरिः प्रचोदयात्